पुत्रकन्ये ॥ मातरं जठरे, मूर्द्ध्नि गुरुं, दक्षिणवामकौ । बाहू भ्राताथ तत्पत्नी स्पृष्ट्वैवं चौरमादिशेत् ॥ अन्तरङ्गमवमुच्य वाह्यगस्पर्शनं यदि करोति पृच्छकः । श्लेष्ममूत्रशकृतस्त्यजन्नधः पातयेत्करतलस्थवस्तु चेत् ॥ भृशमवनामिताङ्गपरिमोटनतोऽप्यथवा, जनहृतरिक्तभाण्डमवलोक्य च चौरजनम् । हृतपतितक्षताक्षृतविनष्टविभग्नगतोन्मुषितक्षताद्यनिष्टरवतो लभते न हृतम् ॥ निगदितमिदं यत्तत् सर्वं तुषास्थिविषादिकैः सह क्षतिकरं पीडार्तानां समं रुदितक्षुतैः । अवयवमपि स्पृष्टान्तःस्थं दृढं सरुदाहरेद् अतिबहु तदा भुक्तान्नं संस्थितः क्षुधितो वदेत् ॥ ललाटस्पर्शनाच्छ्रूकदर्शनाच्छालिजौदनम् । उरःस्पर्शात् षष्टिकान्नं ग्रीवास्पर्शे च यावकम् ॥ कुक्षिकुचजठरजानुस्पर्शे माषाः पयस्तिलयवाग्वः । आस्वादयतश्चौष्ठौ लिहतो मधुरं रसं ज्ञेयम् ॥ विसृक्के स्फोटयेज्जिह्वामम्ले वक्त्रं विकूणयेत् । कटुतिक्तकषायोष्णैर्हिक्केत्, ष्ठीवेच्च सैन्धवे ॥ श्लेष्मत्यागे शुष्कतिक्तं तदल्पं, श्रुत्वा क्रव्यादं प्रेक्ष्य वा मांसमिश्रम् । भ्रूगण्डौष्ठस्पर्शने शाकुनं तद् भुक्तं तेनेत्युक्तमेतन्निमित्तम् ॥ मूर्द्धगलकेशहनुशङ्खकर्णजङ्घं वस्तिं च स्पृष्ट्वा । गजमहिषमेषसूकरगोशशमृगमांससयुग्भुक्तम् ॥ दृष्टे श्रुतेऽप्यशकुने गोधामत्स्यामिषं वदेद्भुक्तम् । गर्भिण्या गर्भस्य च निपतनमेवं प्रकल्पयेत्प्रश्ने ॥ पुंस्त्रीनपुंसकाख्ये दृष्टेऽनुमिते पुरःस्थिते स्पृष्टे ! तज्जन्म भवति पानान्नपुष्पफलदर्शने च शुभम् ॥ अङ्गुष्ठेन भ्रूदरं वाङ्गुलिं वा स्पृष्ट्वा पृच्छेद्गर्भचिन्ता तदा स्यात् । मध्वाज्याद्यैर्हेमरत्नप्रवालैरग्रस्थैर्वा मातृधात्र्यात्मजैश्च ॥ गर्भयुता जठरे करगे स्याद् दुष्टनिमित्तवशात्तदुदासः । कर्षति तज्जठरं यदि पीठोत्पीड़नतः करगे च करेऽपि । प्राणाया दक्षिणे द्वारे स्पृष्टे मासोत्तरं वदेत् । वामे द्वौ कर्णे एवं मा द्विचतुर्भैः श्रुतिस्तने ॥ वेणीमूले त्रीन् सुतान् कन्यके द्वे कर्णे पुत्रान् पञ्च हस्ते त्रयं च । अङ्गुष्ठान्ते पञ्चकं चानुपूर्व्या पादाङ्गुष्ठे पार्ष्णियुग्मेऽपि कन्याम् ॥ सव्यासव्योरुसंस्पर्शे स्तूते कन्यासुतद्वयम् । स्पृष्टे ललाटमध्यान्ते चतुस्त्रितनयान् वदेत् ॥ शिरोललाटभ्रूकर्णगण्डहनुरदा गलम् । सव्यापसव्यस्कन्धश्च हस्तौ चिबुकनालकम् ॥ उरः कुचं दक्षिणमप्यसव्यं हृत् पार्श्वमेवं जठरं कटिश्च । स्फिक् पायुसन्ध्यूरुयुगं च जानू जङ्घे च पदावितिक्षिकादौ ॥ इति निगदितमेतद्गात्रसंस्पर्शलक्ष्म प्रकटमभिमताद्यैर्वीक्ष्य शास्त्राणि सम्यक् । विपुलमतिरुदारो वेत्ति यः सर्वमेतन्नरपतिजनताभिः पूज्यतेऽसौ सदैव ॥ इति वृहत्संहितायामङ्गविद्या प्रकरणम् । "वास्तुविद्याङ्गविद्या चेति" गर्गः । अङ्गविद्याया व्याख्यानो ग्रन्थः ऋगयना० अण् । आङ्गविद्यस्तद्व्याख्यानग्रन्थे ।

**अङ्गविधि** पु० अङ्गस्य प्रधानोपकारिणः विधिः विधानम् । गुणविध्यपरपर्य्याये विधिभेदे । तथाहि इष्टसाधनताकार्य्यत्वादिबोधकवाक्यं विधिः । स च प्रमाणान्तरैरप्राप्तस्यैव बोधकतयोत्पत्तिविधिः "विधिरत्यन्तमप्राप्तौ" इत्युक्तेः । तथा च प्रमाणान्तराप्राप्तकर्म्मणि इष्टसाधनताकार्य्यतादिबोधकं वाक्यं प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वात् उत्पत्तिविधिः । यत्र तु प्राप्तस्यैव कर्म्मणोऽनुवादेन तस्य द्रव्यदेवतादौ इष्टसाधनतादिकं बोध्यते सोऽयमङ्गविधिः सच स्वविषये प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वात् विधिरेव । किन्तु प्रधानविधिविधेयकर्म्मणोऽङ्गबोधकतया अङ्गविधिरित्येव विशेषः यथा, अग्निहोत्रं जुहोतीत्युत्पत्तिविधिवाक्येन प्राप्तस्याग्निहोत्रस्य गुणविधानाय प्रवृत्तं दध्ना जुहोतीति वाक्यं प्राप्ताग्निहोत्रानुवादेन दधिकरणत्वमात्रं बोधयत् दध्नि इष्टसाधनताबोधनेन तत्र प्रवर्त्तयतीति दध्ना जुहोतीति वाक्यं गुणविधिरङ्गविधिरिति च उच्यते । एवमन्यान्युदाहार्य्याणि । तच्चाङ्गं क्वचित् कालः क्वचित् द्रव्यं क्वचित् देवतादि इति नानाविधम् अतएवोक्तं "कार्म्मासन्निहितं नैव बुद्धौ विपरिवर्त्तते । शब्दात्तु तदुपस्थानमुपादेये गुणे भवेदिति" भट्टैः । विवृतञ्चैतत् रघुनन्दनेन प्रमाणान्तरासन्निहितं कर्म प्रथमं बुद्धौ न विषयीभवति प्राथमिकी शब्दादेव तस्य कर्मण उपस्थितिरिति उपादेये विधेये कर्म्मणि तिथ्यादिगुणे इति" ।

**अङ्गवैकृत** न० विकृतस्य भावः विकृत+अण् अङ्गेन अङ्गचेष्टया वैकृतं हृदयभावो ज्ञाप्यते यत्र बहु० । आकार इति ख्यातायाम्-हृदयगतभावावेदकचेष्टायाम् । ६त० । अङ्गस्य विकारे न० ।

**अङ्गवैगुण्य** न० अङ्गस्य प्रधानोपकारिणः वैगुण्यमन्यथाकरणम् । प्रधानकर्म्माङ्गीभूतद्रव्यादेरन्यथाकरणे यद्दोषनिवारणार्थं विष्णुस्मरणं कर्त्तव्यतया विहितं "यदसाङ्गं कृतं कर्म्म जानता वाप्यजानता साङ्गं भवतु तत् सर्वं हरेर्नामानुकीर्त्तनादिति" स्मृतिः । अतएव श्राद्धादिपद्धतौ कर्म्मान्ते यत् किञ्चिदङ्गवैगुण्यं जातं तद्दोषप्रशमनाय विष्णुस्मरणमहं करिष्ये इत्यभिलापवाक्यम् ।